# shrIgopAlastavaH

# શ્રીગોપાલસ્તવઃ

## Document Information

Text title : gopAlastavaH

File name : gopAlastavaH.itx

Category : vishhnu, krishna, vishnu, raghunAthajI, puShTimArgIya, stava

Location : doc_vishhnu

Author : Raghunathaji

Proofread by : PSA Easwaran

Description/comments : puShTimArgIya stotraratnAkara

Latest update : May 17, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# શ્રીગોપાલસ્તવઃ

યેન મીનસ્વરૂપેણ વેદાઃ સંરક્ષિતાઃ પુરા ।
સ એવ વેદસંહર્તા ગોપાલઃ શરણં મમ ॥ ૧॥

પૃષ્ઠે યઃ કૂર્મરૂપેણ દધાર ધરણીતલમ્ ।
સ એવ સૃષ્ટિસંહર્તા ગોપાલઃ શરણં મમ ॥ ૨॥

વરાહરૂપઃ સમ્ભૂત્યા દંષ્ટાગ્રે યો મહીં દધૌ ।
સભૂમિભારહરણો ગોપાલઃ શરણં મમ ॥ ૩॥

જગ્રાહ યો નૃસિંહસ્ય રૂપં પ્રહ્લાદહેતવે ।
સ યોદ્ધુમુદ્યતઃ સમ્યક્ ગોપાલઃ શરણં મમ ॥ ૪॥

યેન વામનરૂપેણ વઞ્ચિતો બલિભૂમિપઃ ।
સ એવ ગોપનારીભિર્ગોપાલઃ શરણં મમ ॥ ૫॥

યેનેયં જામદગ્ન્યેન પૃથ્વી નિઃક્ષત્રિયા કૃતા ।
સ એવ ક્ષત્રિયહિતો ગોપાલઃ શરણં મમ ॥ ૬॥

દશાસ્યો દાશરથિના યેન રામેણ મારિતઃ ।
સ પઞ્ચાસ્યપ્રાપ્તબલો ગોપાલઃ શરણં મમ ॥ ૭॥

કાલિન્દી કર્ષિતા યેન રામરૂપેણ કૌતુકાત્ ।
તજ્જલક્રીડનાસક્તો ગોપાલઃ શરણં મમ ॥ ૮॥

યેન બૌદ્ધસ્વરૂપેણ લોકાઃ પાખણ્ડમાર્ગગાઃ ।
સ એવ પાખણ્ડહરો ગોપાલઃ શરણં મમ ॥ ૯॥

ગમિષ્યન્તિ ક્ષયં યેન રાક્ષસાઃ કલ્કિરૂપિણા ।
સ રક્ષસાં ગતિર્દાતા ગોપાલઃ શરણં મમ ॥ ૧૦॥

ગોવર્ધનો ગિરિર્યેન સ્થાપિતઃ કઞ્જવત્કરે ।
ઉલૂખલેન સહિતો ગોપાલઃ શરણં મમ ॥ ૧૧॥

એકાદશ સ્વીયધામ્નામાવલિં યો લિખેત્ હૃદિ ।
કૃષ્ણપ્રસાદયુક્તશ્ચ સ યાતિ પરમાં ગતિમ્ ॥ ૧૨॥

ઇતિ શ્રીરઘુનાથવર્યવિરચિતો ગોપાલસ્તવઃ સમાપ્તઃ ।

Proofread by PSA Easwaran

*shrIgopAlastavaH*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*